**Sri Sathya Sai Books and Publications Trust, Prasanthi Nilayam.**

# श्री रुद्रम्

## 8th Anuvaka

**ॐ हर हर हर हर ॐ**

om hara hara hara hara om

**नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च**

namaḥ somāya ca rudrāya ca namastāmrāya cāruṇāya ca

**नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च**

namaḥ śaṅgāya ca paśupataye ca nama ugrāya ca bhīmāya ca

**नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च**

namo agrevadhāya ca dūrevadhāya ca namo hantre ca hanīyase ca

**नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च**

namo vṛkṣebhyo harikeśebhyo namastārāya namaśśambhave ca mayobhave ca

**नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च**

namaḥ śaṅkarāya ca mayaskarāya ca namaḥ śivāya ca śivatarāya ca

**नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च**

namastīrthyāya ca kūlyāya ca namaḥ pāryāya cāvāryāya ca

**नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च**

namaḥ prataraṇāya cottaraṇāya ca nama ātāryāya cālādyāya ca

**नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥८॥**

namaḥ śaṣpyāya ca phenyāya ca namaḥ sikatyāya ca pravāhyāya ca ||**8**||